पञ्चो यदेकस्त्रिविधः कृतः” हरिवंशे २१२ अध्याये ।

**त्रैताय** पु० त्रेतानामकोऽयः । द्यूतभेदे कृतायशब्दे दृश्यम् ।

**त्रैतिनी** स्त्री त्रेता अस्त्यत्र इनि ङीप् । त्रेताग्निसाध्यक्रियायाम् “जह्वा यत्ते त्रैतिनी भूत्” ऋ० १०।१०५।९।

**त्रैधा** अव्य० त्रि+प्रकारे एधाच् । त्रिप्रकारे “इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्” ऋ० १।२२।१७ “एकस्त्रेधा विहितो जातवेदाः” अथ० १८।४।११। “तुभ्यं त्रेधा स्थितात्मने” कुमा० ।

**त्रै** पालने भ्वा०आ० सक० अनिट् । त्रायते अत्रास्त । त्राणः त्रातः । “मृत्योरात्मानं त्रायते” शत० ब्रा० २।२।४।७ । “गायन्तं त्रायते यस्मात् गायत्री तेन कीर्तिता” स्मृतिः “पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः” मनुः । “त्रातेयं कुरु सौमित्रे ! भयात् त्रायस्व राघवम्” भट्टिः । [ त्रिंशदध्यायपरिमिते ब्राह्मणभेदे ।

**त्रैंश** न० त्रिंशदध्यायाः परिमाणमस्य ब्राह्मणस्य ड ।

**त्रैककुद** न० त्रिककुद् नाम पर्वतः तत्र भवः अण् । सौराञ्जने ।“वृत्रस्येत्यक्ष्यावनक्ति त्रैककुदाञ्जनेनाभावेऽन्यद्दक्षिणं त्रिरुत्तरं पराक्सकृत्सकृन्मन्त्रः शरेषीकया साग्रया” कात्या० श्रौ० ७।२।२४ । “अध्वर्युः साग्रया शरेषीकया शरस्याग्रशलाकया त्रैककुदाञ्जनेन सौवीराञ्जनेन यजमानस्य अक्ष्यौ चक्षुषी अक्षिणी पराक् अनाहृत्तमनक्तिनेत्रयासुतस्य तत्र दक्षिणं चक्षुर्द्विरनक्ति उत्तरं त्रिवारम् । तत्राञ्जनमन्त्रः सकृत् सकृत्पठनीयः । त्रिककुत् पर्वतस्तत्र भवमञ्जनं त्रैककुदं सौवीरमिति यत् प्रसिद्धम् । त्रैककुदाभावेऽन्यत् लोकप्रसिद्धं यत् कज्जलादि । आपस्तम्बः“वृत्रस्य कनीनिकासीति त्रैककुदेनाञ्जनेनाङ्क्ते यदि त्रैककुदं नाधिगच्छेद्येनैव केनाञ्जनेनाञ्जीतेति” कर्कः । “त्रैककुदं भवति । यत्र वा इन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत्तद्यद्त्रैककुदं भवति चक्षुष्येवैतच्चक्षुर्दधाति तस्मात्त्रैककुदं भवति यदि त्रैककुदं न विन्देदप्यत्रैककुदमेव स्यात् समानी ह्येवाञ्जनस्य बन्धुता” शत० ब्रा० ३।१।३।१२ ।

**त्रैकालिक** त्रि० त्रिकाले भवः ठञ् । १भूतभविष्यद्वर्त्तमानकालवर्त्तिनि “त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं तथेप्सितम्” भा० शा० २४२ अ० । २त्रिसन्ध्यव्यापके च ।

**त्रैकाल्य** न०त्रिकाल+स्वार्थे ष्यञ् । भूतादिषु त्रिषु कालेषु । “क्षणालवाश्च काष्ठाश्च कलास्त्रैकाल्यमेव च” हरिवं० ४१ अ० । “त्रैकाल्यसन्ध्याकरणात् तत् सर्वं विप्रणश्यति” याज्ञ० ।

**त्रैगर्त्तक** त्रि० त्रिगर्तस्य देशभेदस्यादूरदेशादि चतुरर्थ्यां अरीहणा० वुञ् । त्रिगर्त्तदेशस्यादूरदेशादौ ।

**त्रैगुणिक** त्रि० त्रिगुणार्थं द्रव्यमेकगुणं प्रयच्छति । “तत् प्रयच्छति गर्ह्यम्” पा०ठक् । त्रिगुणमादातुमेकगुणद्रव्यप्रयोक्तरि वार्द्धुषिकभेदे ।

**त्रैगुण्य** न० त्रिगुणानां भावः कर्म वा स्वार्थे ष्यञ् तेन निर्वृत्तं वा । १सत्वादिगुणत्रये २तद्भावे ३तत्साध्ये संसारे च “त्रैगुण्यविषया वेदानिस्त्रैगुण्योभवार्जुन !” गीता । “अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययेऽभावात्” “पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव” सा० का० ।

**त्रैत** पु० त्रीन् वत्सान् तनोति युगपत् तन—बा० ड त्रितो गर्भभेदस्तत्र भवः अण् । युगपज्जन्माधायकगर्भजाते पशौ । “रूपेणैवावरुन्द्धे सौमापौष्णं त्रैतमालभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभिजायेते ऊर्जं पुष्टिं तृतीयः” तै० स० २।१।१।६ “त्रयाणां वत्सानां युगपज्जातानां तः समुदायस्त्रितः तत्र भवस्त्रैतः तेषामन्यतमः इत्यर्थः। त्रयाणामुत्पत्तौ प्रयोजनमेवमुन्नेयम् अजाया स्तावद्द्वौ स्तनौ प्रसिद्धौ तौ नानैव पृथगेव पातुं द्वौ वत्सौ जायेते मातृरूपायामजायां येयमूर्क् पयःसारं या च शरीरगता पुष्टिस्तदुभयं स्थापयितुं तृतीयो वत्स उत्पन्नः द्वावेव हि सर्वत्र जायेते तृतीयस्तु क्वचिदेव तथा सति यस्यां तृतीयो जातस्तस्याः शरीरे वीर्याधिक्यं पुष्ट्याधिक्यञ्चास्तीति लक्षयितुं शक्यते” भा० अत्र भाष्ये समुदेत्यस्मिन् इत्याधारे अचि गर्भपरतेति बोध्यम् ।

**त्रैतन** पु० अत्यन्तनिर्घृणे दासभेदे । “शिरो यदस्य त्रैतनो वितक्षत् स्वयं दासः” ऋ० १।१५८।५ । “त्रैतन एतन्नामको दासोऽत्यन्तनिर्घृणः” भा० ।

**त्रैदशिक** न० त्रिदशा देवता अस्य ठञ् । दैवे अङ्गुल्यग्ररूपे तीर्थे । “ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन” मनुः ।

**त्रैधस्** अव्य० त्रि+प्रकारे धमुञ् । त्रिप्रकारे “व्रताशक्तौ वा त्रैधं तण्डुलान् विभज्य” कात्या० श्रौ० २५।४।४० “सर्वमेव हठेनैके दैवेनैके वदन्त्युत । पुंसः प्रयत्नजं किञ्चित्त्रैधमेतन्निरुच्यते” भा० व० ३२ अ० ।

**त्रैधर्म्म्य** न०त्रयाणां वेदानां धर्म्मान् हौत्राध्वर्य्यवौद्गात्रान-